ऽस्तु" ताण्ड्य०ब्रा० १।८।२स्था०। प्र+अञ्च-घञर्थे भावे घञ्। २प्रकृष्टगमने प्राचैःशब्दे स०भाष्ये दृश्यम्।

**प्राचिका** स्त्री प्राचिनोति मधु प्र+आ+चि-ड स्वार्थे कापि अत इत्त्वम्। वनमक्षिकायाम् अमरः।

**प्राचिन्वत्** पु० राजभेदे "जनमेजयः खल्वनन्तां नामोपयेमे माधवीं तस्यामस्य जज्ञे प्राचिन्वान्नाम। यः प्राचीं दिशं जिगाय यावत् सूर्योदयात् ततस्तस्य प्राचिन्वत्त्वम्" भा० आ० ६५ अ०।

**प्राचीन** त्रि० प्राक्+भवार्थे ख। १पूर्वदिग्देशादौ भवे। २वनतिक्तायाम् (आकनादि) अमरः ३राजायाञ्च स्त्री शब्दच० टाप्।

**प्राचीनगर्भ** पु० ऋषिभेदे भा०शा० ३५१अ०।

**प्राचीनपनस** पु० नित्यकर्म०। बिल्वे त्रिका०।

**प्राचीनबर्हिस्** पु०। १इन्द्रे २नृपभेदे च हेमच०। "अत्रि-वंशे समुत्पन्नो ब्रह्मयोनिः सनातनः। प्राचीनबर्हिर्भगवां-स्तस्मात् प्रचेतसो दश" भा०शा० २०८अ०। "प्राचीनबर्हि-र्भगवान् महानासीत् प्रजापतिः। हविर्धानात् द्विज-श्रेष्ठ! येन संवर्द्धिताः प्रजाः। प्राचीनाग्राः कुशास्तस्य पृथिव्यां विश्रुता मुने!। प्राचीनबर्हिर्भगवान् ख्यातो भुवि महाबलः" अग्निपु० उक्ते ३हविर्धान्नः पुत्रे भा० अनु० १४७ अ०।

**प्राचीनयोग** पु० प्राचीनो योगोऽस्य। ऋषिभेदे तस्य गो-त्रापत्यं गर्गा०यञ्। प्राचीनयोग्य तद्गोत्रापत्ये पुंस्त्री०

**प्राचीनयोगिनीपुत्र** यजुर्वेदवंश्यस्ये ऋषिभेदे शत०ब्रा० १४।९।४।३२।

**प्राचीनामलक** न० नित्यकर्म०। पानीयामलके अमरः।

**प्राचीनावीत** न० "सव्यं बाहुं समुद्धृत्य दक्षिणे तु द्वि-जातयः!। प्राचीनावीतमित्युक्तं पैत्र्ये कर्मणि योज-येत्" इत्युक्ते श्राद्धादौ कर्त्तव्ये वामकरे बहिष्कृते सति दक्षिणस्कन्धार्पिते यज्ञसूत्रादौ।

**प्राचीनावीतिन्** पु० प्राचीनावीतमस्त्यस्य इनि। तद्युते "उद्धृते दक्षिणे पाणावुपवीत्युच्यते द्विजः। सव्ये प्रा-चीनावीती निवीती कण्ठसज्जने" मनुः। गोभिलः "दक्षिणं बाहुमुद्धृत्य शिरोऽवधाय सव्येऽंसे प्रतिष्ठापयति दक्षिणं कक्षमवलम्बं भवति एवं यज्ञोपवीती भवति। सव्यं बाहुमुद्धृत्य शिरोऽवधाय दक्षिणेंऽसे प्रतिष्ठापयति सव्यं कक्षमवलम्बनं भवत्येवं प्राचीनावीती भवति"।

**प्राचीपति** पु० ६त०। इन्द्रे त्रिका०।

**प्राचीर** न० प्राचीयते प्र+आ-चि-क्रन् दीर्घश्च। सर्वतो वेष्टनाकारे इष्टकादिनिर्मिते आवरणे (पाँचिर) अमरः अस्य मुख्यं तन्मानादि च युक्तिकल्पतरावुक्तं यथा "गजैरभेद्यामनुजैरलङ्घ्याः प्राचीरखण्डा नृपतेर्भवन्ति। राजदण्डोन्नताः सर्वे प्राचीराः पृथिवीभुजः। विंश-तिस्ते तु पश्चाच्च पार्श्वयोः पञ्च पञ्च च। पश्चात् पञ्च च विज्ञेयाः प्राचीराः पृथिवीभुजः। सर्वप्रान्ते त्वाव-रणो नाम प्राचीर उच्यते। प्रतिप्राकारसंस्थानं द्वारं नाभिमुखस्थितम्"। "राजच्छत्रान्तरे पञ्च राजद्वारे महीपतेः। राजदण्डत्रये सार्द्धे जयद्वारे प्रति-ष्ठिताः। अद्वारे राजदण्डार्द्धे प्राचीराः पृथिवीपतेः। एवं व्यवस्थिते स्थाने मध्यमे तद्धि तिष्ठति। राजच्छत्र-द्वयं सार्द्धमायामे जयवस्तुनि। परिखाहे पञ्च राज-दण्डांस्तिष्ठन्ति मध्यतः। राजपट्टाभिधानेन स्थानमेत-च्चिगद्यते। अस्मिन् नृदृहं नृपः कृत्वा सुचिरं सुखमश्नुते"

**प्राचेतस** पु० प्रचेतस्+अपत्यादौ अण्। १वाल्मीकिमुनौ २प्राचीनबर्हिषो नृपस्य पुत्रे ३वरुणस्य पुत्रे च।

**प्राचैस्** न० प्र+आ+चि-बा०डैसि। प्राचीने ऋ०१।८३।२भा-ष्यम्। तत्र च पक्षान्तरे प्राचैरित्यत्र प्राचशब्दस्तृती-याबहुवचनान्त इत्युक्ता प्राचैः प्राञ्चैरित्युक्तम्।

**प्राच्य** त्रि० प्राचि भवः यत्। १शरावत्या नद्याः प्रागदक्षिणे देशे अमरः। प्राच्यां दिशि प्राचि देशे काले वा २भवे त्रि०। "प्राच्यैर्होलका कर्त्तव्या" दायभा०।

**प्राच्यवाट** न० प्राच्यो वाटो यस्य। प्रागदेशस्थे दशकुमा०।

**प्राच्यवृत्ति** स्त्री "पूर्वेण युतोऽथ पञ्चमः प्राच्यवृत्तिरुदितेह युग्मयोः" इ०र०उक्ते १छन्दोभेदे। कर्म०। २प्राचीनायां वृत्तौ स्त्री ब०स०। ३तथाविधवृत्तियुते त्रि०।

**प्राच्यसप्तसम** त्रि० सप्त समाः प्रमाणमस्य मात्रच् तस्य द्विगु-त्वात् लुक् कर्म०। प्राचीने सप्तसमे "द्विगो प्रमाणे" पा० तस्य प्रकृतिस्वरः।

**प्राच्यायन** पुंस्त्री० प्राच्यस्य गोत्रापत्यम् अश्वा० फञ्। प्राच्यस्य गोत्रापत्ये। [प्राड्विवेकः।

**प्राच्छ्** त्रि० पृच्छति प्रच्छ-क्विप् निपा० दीर्घश्च। जिज्ञासके

**प्राजक** पु० प्र+अज-ण्वुल् वीभावाभावः। सारथौ "यत्राप वर्त्तते युग्यं वैगुण्यात् प्राजकस्य च" मनुः।

**प्राजन** न०प्र+अज-करणे ल्युट् व्यभावः। तोदने पश्वादिचाल-नदण्डे (पाचनी) अमरः। [प्राजयाज्ञ्य प्रजया कृत्वा वा।

**प्राजया** अव्य० प्राजनक्रियायाम् सामा० वा गतिसंज्ञा।